No 70

पुनराधान-मीमांसा

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥अथपुनराधाननिमित्तानि॥गृहेअग्निंत्यक्त्वादंपत्योः ग्रा
मांतरेसीमांतरेवारात्रौनिवासेपुनराधानं॥ततःसायंप्रातःहोमकालेऽभयोः
अग्नेःअसन्निधानेपुन०॥सायंप्रातर्वाग्निनाशेउदयास्तात्प्राक्कृमेणाग्निं
मथित्वावालौकिकंवाआहृत्यप्रागुदयात्स्थापयेत्॥लौकिकाभावेजलंवाकुश
स्तंबंवाद्विजंवाआज्यंवाअग्निस्थानेआनीयउदयास्तमयोःप्राक्स्थापयेत्॥
यदिप्रागुदयादस्ताद्वामथनाग्निःलौकिकोवाजलादिकंवानस्थापितं॥मंथ
नमविनारब्धंतदापुन०॥मंथनारंभेविनाप्रागुदयादस्ताद्वाजलादेरस्थापने
पुन०॥अग्निनाशोत्तरंहोमकालंद्व्यतिक्रमेपुन०॥अग्निसङ्गवेपिहोमा
ष्टकलोपेपुन०॥दूरंत्वनापदि॥आपदिसूतकादौतुसत्यग्नौद्वादशाद
धिकहोमलोपेपुन०॥केचित्तुआशौचाद्यापदंतेमनस्त्यक्त्वाचतुर्हो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नहोमः कार्यइतीच्छंति॥अत्यापदिवार्षिकहोमलोपेपुन०॥केचित्तुपक्ष
मात्रहोमलोपेपक्षांतेवत्सरांतेवासर्वानतिक्रांतान्समुदायेनकृत्वाअग्न
येतंतुमतेचरुः कार्यइति॥इदंतुरत्नमालायां॥स्थालीपाकंविनाकार्यो
दित्रादिहोमलोपेपितंतुमतेचरुः॥केचित्तुद्वादशाहुतिविच्छेदमनस्त
तीहोममिच्छंति॥अविच्छिन्नपक्षहोमत्रयकरणेपुन०॥उदकेनसर्वा
ग्निनाश नेपुन०॥दंपत्योःपर्वणिपराग्निपक्वभोजनेपुन०अनापदि
पर्वणिसन्निधानेयजमानेनहोमाकरणेपुन०॥इदंतुदेवयाज्ञिकाः॥पर्व
सन्निधौयजमानप्रवासेपुन०॥स्थालीपाकत्रयलोपेपुन०॥इदंतुगंगा
धरपद्धतौ॥वर्षमात्रंयजमानेनहोमाकारणेपुन०॥पवित्रेष्टिर्वा॥सूतके १

असपिंडशवस्पृष्ट्वानुगमनंतथा॥ज्याहेताग्निप्रकुर्वितिपुन०
मिश्र

मृतकेवापिदंपत्योःप्रवासेपुन०॥अग्निहोत्रिणःशवानुगमनेपुन०॥अ
थकारिका॥शवानुगमनेचैवशवसंस्पर्शनेतथा॥पुनरेवाग्निमादध्या
दितिशातातपोब्रवीत्॥आहिताग्नेःप्रमादाच्चेछवानुगमनंयदि॥अग्निना
या शंविजानीत्सपिंडेषुनदोषभागिति॥इदंतुपितृमतिं॥सूतकेमृतके पचना परं
ग्नेरेकरात्रमपचनेपुन०॥मिश्रसंप्रदायः॥रजोदोषसूतकेमृतकेपुन०॥
अनापदिचांडालादितोमूत्रादिशवस्पर्शेअग्नेःस्पर्शेपुन०॥इदंतुदेवजा
निपद्धतौ॥स्वकीयमरणेपाथिकृतेष्टिः॥अंगनाशेंगनानाशेपुनराधेयमि
ष्यते॥ज्यानिःसर्वस्वहानिःस्यात्स्पष्टंमाध्यंदिनेश्रुतिः॥आपदितुपुनस्त्वे
तिसमिंधनं॥अरणीसमारूढस्पर्शेपीतिकेचित्॥अनंतभाष्ये॥तत्क्षणा

२ दिकमेवेत्यन्ये॥अग्निंविनापत्न्याःसमुद्गातिक्रमेपुन०॥भर्त्तरिसपत्न्यांवा
अग्निसमीपेतिष्ठंत्यांपत्न्यंतरस्यसमुद्गातिक्रमेपुन०॥इत्यन्ये॥एकाकिन्याः
अग्निभिःसहप्रवासेपुन०॥राष्ट्रभंशादिभयसमुत्पन्नौएकाकिन्याःसहाग्नि
न भिर्गमनेपुन०॥इदंतुमाधवदीक्षितपद्धतौ॥शिक्येनोद्वहनेपुन०॥गंगाध
रपद्धतौप्रवासधर्मः॥प्रस्थितेनयजमानेनतद्दिनेखउपविश्यप्राणाया
मादिसंकल्पंत्यागोपस्थानंचकुर्यात्॥श्राद्धकालेप्राप्तेश्राद्धत्यागःकार्यः॥
प्रवासेक्रीयमाणेप्रसंगात्तीर्थश्राद्धेसत्यामामान्नेनश्राद्धंपिंडदानंकार्यं॥अ
यनुसारेणमासद्वयषण्मासंवत्सरादूर्ध्वंपुनराधानं॥तीर्थार्थं देवा
र्थंवाप्रवासेपुन०॥अर्थार्थंप्रवासेदोषोनास्ति॥पर्वणिअनग्निपक्वंभो

२

जनं॥सक्तुरक्षुविकारेपयोविकारेदोषोनास्तिसकृत्॥अज्ञातायाचित
३ प्राप्तोग्रहीत्वाभोजनं॥अनिंधेसंबंधिन्यवश्यंभोक्तव्यं॥अत्यंतापत्तौ
स्वसत्तयापाकंकृत्वाभोक्तव्यं॥अज्ञानात्पर्वणिपरान्नभोजनंकृःप्राजाप
त्यः॥कामतोप्राजापत्यत्रयं॥नितरामभ्यस्तेपर्वणिपरान्नभोजनेपुन०॥
प्रवासस्थेयजमानेसायंप्रातर्होमःपक्वादिपिंडपितृयज्ञादिऋत्विक्करो
ति॥पत्नीसन्निहितासतीत्यागदानंकरोति॥साचेदनधिकारिणीअ
शक्तावा तदाहोमकर्त्तृ त्यागदानंकरोति॥ऋत्विग्भावेपत्नीहोमंकरो
ति॥स्वकुमारीच॥ ॥इतिपुनराधाननिमित्तानिसमाप्तानि॥ ॥ ॥

३

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY